**दिनाङ्क :- 04.08.2024**
**प्रात: - 06: 55**

## अथ वार्ता:

## राष्ट्रपतिः

गतदिने राष्ट्रपतिभवने द्विदिवसीयं राज्यपालानां सम्मेलनं समाप्तिं गतम्। राष्ट्रपतिद्रौपदी मुर्मुः परस्परशिक्षणस्य भावनायां व्यापकविमर्शं कर्तुं राज्यपालानां सामूहिकप्रयत्नानां प्रशंसाम् अकरोत्। स्वकीयेसमापनाभिभाषणे सा उक्तवती यत् राज्यपालानां विभिन्नसमूहः स्वकार्यालयस्य कार्यप्रदर्शनस्य उन्नयनार्थं अपि च जनानां कल्याणाय स्वस्य बहुमूल्यं परामर्शं प्रदत्तवन्तः। समेऽपि परामर्शाः कार्यान्विताः भविष्यन्ति इति सा विश्वासं प्रकटितवति। राष्ट्रपतिः अवदत् यत् देशस्य विकासः राज्यानां समावेशी त्वरितविकासस्योपरि निर्भरः अस्ति।

## कृष्यर्थशस्त्रिसम्मेलनम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् भारतं खाद्यसमृद्धराष्ट्रमस्ति सममेव वैश्विकखाद्यसुरक्षायाः वैश्विक-पोषणसुरक्षायाः च उपायेषु संलग्नमस्ति। असौ अग्रे अवदत् यत्, सर्वकारः संशोधनैः सह कृषिक्षेत्रं सुदृढं कुर्वन् अस्ति अथ च अस्योद्देश्यं कृषकाणां जीवने संशोधनस्य आनयनं वर्तते । गतदिने नवदिल्ल्यां कृष्यर्थशस्त्रिणां द्वात्रिंशत्तम् अन्ताराष्ट्रिय-सम्मेलनम् सम्बोधयन् श्रीमोदी प्रोक्तवान् यत् कृषिः प्रशासनस्य आर्थिकनीतेः केन्द्रबिन्दुः अस्ति इति। अनेन पुनः भणितं यत् भारतं तृणधान्यानां, दुग्धस्य, द्विदलानाम् उपस्कराणां च बृहत्तमः उत्पादकदेशो विद्यते ।प्रधानमन्त्री उक्तवान् यत् भारतं रासायनिक-मुक्त-प्राकृतिक-कृषिं प्रवर्धयति। अस्य वित्तीयवर्षस्य केन्द्रीयायव्ययकेऽपि सततकृषेः कृते ध्यानं प्रदीयते। श्रीमोदी अभिव्यक्तवान् यत् प्रशासनेन गतदशवर्षेषु नवशताधिकैकसहस्रं नूतनानाम् ऋतु -अनुकूल -सस्यानाम् अनेकप्रकाराः प्रदत्ताः। एतस्मिन् अन्ताराष्ट्रियसम्मेलने प्रायशः पञ्चसप्ततिः देशानाम् सहस्राधिकाः प्रतिनिधयः भागं गृह्णन्ति | अस्य वर्षस्य सम्मेलनस्य विषयः अस्ति- सतत कृषि-खाद्य-प्रणालीदिशिपरिवर्तनम्। अस्मिन् अवसरे केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अवदत् यत्, प्रधानमन्त्रिणः श्रीमोदिनः नेतृत्वे भारतस्य कृषिवृद्धिः निरन्तरं विश्वे एव सर्वाधिकी वृद्धि: विद्यते इति।

## उत्तराखण्डस्य आपदा

उत्तराखण्डस्य आपदा प्रभावितक्षेत्रेषु सहायोद्धारकार्यं अविरतं प्रचलति। ह्य: देहरादूने आयोजिते उच्चस्तरीयोपवेशने मुख्यमन्त्री पुष्करसिंहधामीः वरिष्ठाधिकारिभ्यः सहायोद्धारकार्यं तीव्रगत्या कर्तुं निर्देशं दत्तवान्। केदारनाथपदमार्गे शीघ्रमेव यातायातस्य पुनर्स्थापनार्थं क्षतिग्रस्तस्थानानां तत्कालमेव परिष्कारं कर्तुं अपि मुख्यमन्त्री अवदत्। अस्मदीय वार्ताहरै: सह संवादं कुर्वन् सः अवोचत् यत् तीर्थयात्रिकाणां सुरक्षा प्रशासनस्य प्राथमिकता अस्ति। आपदायां क्षतिग्रस्तानां मार्गाणां भवनानां च परिष्कार: द्रुतगत्या क्रियते इति सः अब्रवीत्।

## संस्कृत-साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतः भविष्यति। भवन्तः सर्वे श्रोतुं प्रभवन्ति।

## पेरिस ओलम्पिक

पेरिस ओलम्पिक क्रीडायाः उपान्त्यचक्रे अद्य भारतीयः बेडमिण्टन क्रीडकः लक्ष्यसेनः मध्याह्ने सार्धत्रिवादने डेन्मार्क देशस्य विक्टर एक्सेल्सेन इत्यमुं सम्मुखी करिष्यति। विजयेन लक्ष्यः क्रीडायाः अन्तिमेचक्रे स्वकीयं स्थानं सुनिश्चितं करिष्यति। टोक्यो ओलम्पिकपदकविजेत्री लोव्लिना बोर्गोहाइन महिलानां पंचसप्ततिः किलोग्रामवर्गे उपान्त्यक्रीडायां चीनदेशस्य ली किआन् - इत्यनया सह स्पर्धिष्यते।

**।। इति वार्ताः।।**